# भारतीयध्वजसंहिता
# 2002



सत्यमेव जयते

## भारतसर्वकारः
### गृहमन्त्रालयः
### नवदेहली

प्रधानसम्पादकः

**प्रो. श्रीनिवासः वरखेडी**

कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

सम्पादकः

**डॉ. रत्नमोहनझाः**

निदेशकः, मुक्तस्वाध्यायपीठम्

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

अनुवादकः

**डॉ. विश्वजित् प्रामाणिकः**

अनौपचारिकसंस्कृतशिक्षकः

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

प्रकाशकः

**प्रो. रणजितकुमारबर्मन्**

कुलसचिवः, केन्द्रीयसंस्कृतविश्वविद्यालयः,

56-57, सांस्थानिकक्षेत्रम्, नवदेहली-110058

प्रथम-संस्करणम् - 2022

मुद्रकः

**डी.वी. प्रिंटर्स**

97-यू.बी., जवाहरनगरम्, देहली-110007

# सन्देशः

भारतं हिन्दुदेशोऽसौ भारती यत्र भाष्यते।
भारतीयाः प्रजाः सर्वाः भारती यत्र सन्ततिः॥
पूर्वार्धे चन्दनासिक्तं मध्ये शुक्लं सचक्रकम्।
हरिद्वर्णापरार्धञ्च त्रिवर्णं राजते ध्रुवम्॥
त्यागो रागः शमः श्रद्धा रक्तवर्णेन सूचिताः।
हेयत्यागः सुहृद्रागो धर्मे श्रद्धाऽऽत्मनिग्रहः॥
भारतानां स्वधर्मास्ते धर्मैकरतचेतसाम्।
धर्माविरुद्धः कामोऽसौ पुरुषार्थेषु मध्यमः॥
शान्तिस्सत्त्वं क्षमा मोक्षः श्वेतरूपेण संस्थिताः।
धर्मचक्राश्रयास्सर्वे मनुधर्मप्रवर्तकाः॥
अर्थः समृद्धिः सम्भूतिः हरिद्वर्णेऽनुबिम्बिताः।
समृद्धञ्च समर्थञ्च भूतिमद् भारतं महत्॥
त्रिरङ्गं ध्वजमेतद्धि प्रतीकं राष्ट्रचेतना।
प्रतिमा राष्ट्रभक्तानां गेहेगेहे विराजताम्॥

– **श्रीनिवासवरखेडी**
कुलपतिः,
केन्द्रीयसंस्कृतविश्वविद्यालयः

# भारतीयध्वजसंहिता

भारतस्य राष्ट्रियध्वजः भारतीयानाम् आशाकाङ्क्षाणां प्रतिनिधित्वं करोति। अयं ध्वजः अस्मदीयराष्ट्रियगौरवस्य प्रतीकः वर्तते। विगतेषु पञ्चाशति वर्षेषु सशस्त्रबलानां कर्मचारिगणेन सह इतरे अनेके जनाः अस्य त्रिवर्णस्य समुत्तोलनगौरवं प्रदातुं स्वेच्छया स्वजीवनम् उत्सर्गीकृतवन्तः।

सर्वेषामपि मनस्सु राष्ट्रियध्वजाय प्रेम आदरः निष्ठा च वर्तन्ते। तथापि राष्ट्रियध्वजोत्तोलनस्य सन्दर्भे नियमानां प्रथानां परम्पराणां च सूचनाभावः परिदृश्यते। न केवलं जनेषु अपिच सर्वकारीयसंघटनेषु/संस्थासु अपि एतादृशः सूचनाभावः प्राप्यमाणः वर्तते। सर्वकारेण काले काले समुपदिष्टान् असंवैधानिकनिर्देशान् अतिरिच्य अनुचितप्रयोगनिवारणाय राष्ट्रियध्वजप्रदर्शनसंप्रतीकनामाधिनियमः, 1950 (1950 इत्यस्य सं. 12) पुनश्च राष्ट्रियगौरवावमानननिवारणाधिनियमः, 1971 (1971 इत्यस्य सं. 69) इत्यादिभिः उपबन्धैः नियन्त्रितमपि भवति। अस्मिन् सन्दर्भे सर्वेषां लाभाय मार्गदर्शनाय च सर्वनियमानाम्, प्रथानाम्, परम्पराणाञ्च निर्देशान् एकत्र आनेतुं भारतीयध्वजसंहिता, 2002 इति कश्चन प्रयासः वर्तते।

आनुकूल्यार्थं भारतीयध्वजसंहिता, 2002 त्रिषु भागेषु विभक्ता वर्तते। संहितायाः प्रथमभागे राष्ट्रियध्वजस्य विषये सामान्यविवरणं प्रदत्तमस्ति। संहितायाः द्वितीये भागे सामान्यजनता, स्वायत्तसंस्थाः अपिच शैक्षणिकसंस्थाः इत्यादीनां राष्ट्रियध्वजोत्तलनसम्बन्धि विवरणं वर्तते। संहितायाः तृतीयभागस्य सम्बन्धः केन्द्रसर्वकारस्य राज्यसर्वकाराणां तथा तदीयसंघटनानाम् एवं संस्थानां राष्ट्रियध्वजोत्तलनस्य विषयेण साकं वर्तते।

भारतीयध्वजसंहिता, 2002 इतीयं द्व्यधिकद्विसहस्रतमस्य वर्षस्य जनवारीमासस्य षड्विंशतितमात् दिनाङ्कात् प्रभाविनी भविष्यति, पुनश्च इयं ध्वजसंहिता भारतस्य वर्तमानस्वरूपस्य अधिक्रमणं करोति।

## भागः-1

## सामान्यविवरणम्

**1.1** राष्ट्रध्वजे त्रयाणां वर्णानां पट्टिकाः भविष्यन्ति, यत्र समानविस्तारवत्यः तिस्रः आयताकारपट्टिकाः अथवा लघुपट्टिकाः भविष्यन्ति। सर्वोपरि भारतीयकेसरवर्णस्य पट्टिका भविष्यति, अपिच सर्वस्मात् अधः भारतीयहरितवर्णस्य पट्टिका भविष्यति। मध्ये विद्यमानपट्टिका श्वेतवर्णीया भवेत्। यस्याः मध्यभागे समानान्तरे नीलवर्णेन चतुर्विंशत्या अरैः अशोकचक्रस्य एकं चिह्नं स्यात्। इदम् अशोकचक्रम् अधिमान्यतः स्क्रीन् प्रिंटिड अथवा मुद्रितरूपेण अथवा स्टेंसिलरूपेण अथवा उचितरूपेण निष्यूतरूपेण स्यात्। श्वेतपट्टिकायाः केन्द्रभागे विद्यमानम् इदम् अशोकचक्रं ध्वजस्य पार्श्वद्वये स्पष्टतया दृश्येत।

**1.2** भारतस्य राष्ट्रध्वजः हस्तसीवितेन अथवा हस्तनिर्मितेन और्णेन/सूत्रेण/सिल्क इत्यनेन खादीवस्त्रेण निर्मितं स्यात्।

**1.3** राष्ट्रध्वजः आयताकारः स्यात्। ध्वजस्य दैर्घ्यस्य औन्नत्यस्य चानुपातः 2:3 भवेत्।

**1.4** राष्ट्रध्वजस्य मानकाकारः अधोलिखितः स्यात्-

| **ध्वजाकारवर्गः** | **मिलीमिटरमापनदृष्ट्या** |
|---|---|
| 1 | 6300 x 4200 |
| 2 | 3600 x 2400 |
| 3 | 2700 x 1800 |
| 4 | 1800 x 1200 |
| 5 | 1350 x 900 |
| 6 | 900 x 600 |
| 7 | 450 x 300 |
| 8 | 225 x 150 |
| 9 | 150 x 100 |

**1.5** ध्वजारोहणाय योग्याकारवतः ध्वजस्य चयनं कर्तव्यम्। 450x300 मिलीमीटरपरिमिताकारवान् ध्वजः अतिविशिष्टव्यक्तीनां विमानयात्राकाले प्रयुज्यते, 225x150 मिलीमीटरमिताकारवान् ध्वजः मोटरयानेषु प्रयुज्यते पुनश्च 150x100 मिलीमीटराकारवान् ध्वजः उत्पीठिकानिमित्तं प्रयुज्यते।

## भागः-2

साधारणजनता, स्वायत्तसंघटनानि, शैक्षणिकसंस्थाः इत्यादिभिः राष्ट्रियध्वजस्य उत्तोलनम्/प्रदर्शनम्/प्रयोगः

## धारा 1

**2.1** साधारणजनता, स्वायत्तसंघटनानि, शैक्षणिकसंस्थानानि इत्यादिभिः राष्ट्रध्वजप्रदर्शनस्य विषये संप्रतीकनामाधिनियमः, 1950[1] (अनुचितप्रयोगनिवारणप्रसङ्गे) तथा राष्ट्रियगौरवावमानननिवारणाधि-नियमः, 1971[2] तथा सन्दर्भेऽस्मिन् प्रशासिते कस्मिंश्चित् अन्यविधाने प्रदत्तान् समयान् विहाय अन्यः

---

**1.** सम्प्रतीकनामाधिनियमः, 1950 (अनुचितप्रयोगनिवारणप्रसङ्गे)

**धारा 2.** एतदधिनियमानुसारं यावत्पर्यन्तं कस्मिंश्चित् सन्दर्भे अन्यथा आवश्यकता न स्यात्:-

(क) संप्रतीकः इत्यस्य अर्थः अनुसूच्यां विनिर्दिष्टं किमपि चिह्नम्, मुद्रा, ध्वजः, पदकम्, कोट-आफ-आर्म्स, अथवा चित्रात्मकं किमपि स्वरूपं वर्तते।

**धारा 3.** अस्मिन् समये प्रयुक्ते कस्मिन् अपि नियमे विद्यमानेषु बहुषु विषयेषु सत्सु अपि कश्चनापि जनः यः केन्द्रसर्वकारस्य अथवा सर्वकारस्य तादृशः प्राधिकृतः अधिकारी वर्तते। अस्मिन् सन्दर्भे सः जनः पूर्वानुमत्यां केन्द्रीयसर्वकारेण यथानिश्चितम् एतादृशसन्दर्भान् परिस्थितीः च विहाय कस्यचित् व्यवसायस्य, आजीविकायाः कृते कस्मिंश्चित् एकस्वाधिकारविषये अथवा कस्याश्चित् परिकल्पनायाः ट्रेट मार्कविषये, अनुसूच्यां विनिर्दिष्टं किमपि नाम अथवा चिह्नम् अथवा तादृशस्य कस्यचित् प्रतिलिपिं कर्तुं प्रयोगं न करिष्यति अथवा प्रयोगः करणीयः इति प्रस्तावमपि न करिष्यति।

**टिप्पणीः** अस्याधिनियमस्य अनुसूच्यां भारतीयराष्ट्रध्वजः सम्प्रतीकरूपेण निश्चितः।

कोऽपि प्रतिबन्धः न भविष्यति। उपर्युक्तयोः अधिनियमयोः प्रदत्तान् नियमान् मनसि निधाय इमे विषयाः वर्तन्ते, यथा–

I. सम्प्रतीकनामाधिनियमः 1950, (अनुचितप्रयोगनिवारणम्) इत्यस्य उल्लङ्घनं कुर्वन् ध्वजस्य प्रयोगं व्यापारोद्देश्यार्थं कर्तुं न शक्यते।

ii. कस्यचित् जनस्य अथवा कस्यचित् वस्तुनः अभिवादनाय ध्वजस्य अवनमनं न शक्यम्।

iii. सर्वकारस्य प्रस्तावितानुदेशाधारेण अनुरूपसार्वजनिकभवनेषु यत्र सर्वकारः ध्वजस्य अर्धावनमनं कृत्वा ध्वजोत्तोलनस्य अनुदेशं प्रदत्तवान्, तान् अवसरान् विहाय अन्यावसरेषु अर्धावनमनं कृत्वा ध्वजोत्तोलनं न शक्यते।

iv. स्वाभाविकस्तरे मृतसंस्कारविषये आच्छादनरूपेण ध्वजस्य प्रयोगं कर्तुं न शक्यते।

v. ध्वजस्य प्रयोगः न तु कस्मिंश्चित् वस्त्रे अथवा कस्मिंश्चित् गणवेषे भागरूपेण करिष्यते, न तु अस्य प्रयोगः उपाधानेषु, करवस्त्रेषु, नैपकिन इत्यादिषु करिष्यते अथवा कस्याञ्चित् वस्त्रसामग्र्यां कार्मिकशिल्परूपेण अथाव मुद्रणरूपेण करिष्यते।

vi. ध्वजस्योपरि किमपि अक्षरं न लेखिष्यते।

vii. किमपि वस्तु स्वीकर्तुम्, दातुम्, ग्रहीतुम्, अथवा नेतुम् आधारत्वेन ध्वजस्य प्रयोगः न करिष्यते। किन्तु केषुचित् विशेषावसरेषु, राष्ट्रियदिवसेषु यथा गणतन्त्रदिवसस्य अथवा स्वतन्त्रतादिवसस्य समारोहेषु कार्यक्रमाणाम् एकभागरूपेण ध्वजोत्तोलनात् पूर्वम्, तस्मिन् पाटलपुष्पस्य दलानां स्थापनेन काचिदपि आपत्तिः नास्ति।

viii. कस्याश्चित् प्रतिमायाः अनावरणावसरे विशेषतया अथवा पृथक्तया ध्वजः प्रदर्शयिष्यते, किन्तु अस्य प्रयोगः प्रतिमायाः अथवा स्मारकस्य आच्छादनाय न करिष्यते।

---

**2.** राष्ट्रियगौरवावमाननिवारणाधिनियमः, 1971

**धारा 2:** कोऽपि जनः कस्मिन् अपि सार्वजनिकस्थले अथवा कस्मिन् अपि एतादृशे स्थाने यत् स्थानं सार्वजनिकरूपेण दृग्गोचरीभवति, तत्र यदि भारतस्य राष्ट्रध्वजस्य अथवा भारतसंविधानस्य अथवा तदंशभूतस्य कस्यचित् भागस्य दहनं करोति, विकृतिं करोति, विरूपणं करोति, दूषणं करोति, कुरूपणं करोति, प्रमर्दनं करोति, अन्यथा वाचिकशब्दैः लिखितशब्दैः वा अवमाननं करोति, तर्हि तस्य वर्षत्रयस्य कारावासदण्डनेन अथवा अर्थदण्डनेन अथवा उभयथा अपि दण्डनं करिष्यते।

**स्पष्टीकरणम् 1.** भारतसंविधानस्य संशोधनं कर्तुम् अथवा विधिसम्मतपद्धत्या भारतीयराष्ट्रध्वजे परिवर्तनायनदृष्ट्या सर्वकारस्य कस्यचित् उपायस्य समालोचनम् कुर्वन् अथवा अस्वीकृतिं व्यक्तीकुर्वन् कृता काचिदपि टिप्पणी अनया धारया अपराधरूपेण न परिगणयिष्यते।

**स्पष्टीकरणम् 2.** भारतीयराष्ट्रियध्वजाभिव्यक्तौ किमपि चित्रम्, चित्रीकरणम्, चित्राङ्कनम् अथवा भावचित्रम् अथवा भारतीयराष्ट्रियध्वजः अथवा तस्य कोऽपि भागः अथवा भागस्य किमपि अन्यत् किमपि स्पष्टं चित्रणम्, यत् केनचित् पदार्थेन निर्मितम् अथवा पदार्थे दर्शितम् अस्ति इत्येतत् सर्वम् अनुमन्यते।

**स्पष्टीकरणम् 3.** सार्वजनिकस्थलाभिव्यक्तौ तादृशं किमपि स्थानं वर्तते, यत् स्थानं जनतायाः निमित्तम् उपयोगि वर्तते, अथवा यत् स्थानं जनतासम्बन्धि वर्तते अथवा यत्र किमपि सार्वजनिकं वाहनं वर्तते।

ix. कस्यचित् वक्तुः उत्पीठिकायाः आच्छादनाय अथवा मञ्चोपरि वक्तुः आवरणाय ध्वजस्य प्रयोगः कर्तुम् अशक्यः।

x. ज्ञात्वा ध्वजस्य भूमिस्पर्शः तलस्पर्शः वा न स्यात् अथवा जले निमज्जनावसरः अपि न देयः।

xi. वाहनस्य रेलयानस्य नौकायाः अथवा वायुयानस्य उपरि पार्श्वतः अथवा पृष्ठतः आच्छादयितुं ध्वजप्रयोगः न करणीयः।

xii. भवनम् आच्छादयितुं ध्वजप्रयोगः न करणीयः।

xiii. ज्ञात्वा केशरवर्णम् अधः प्रदर्श्य ध्वजोत्तोलनं न करणीयम्।

**2.2** साधारणजनता, असर्वकारीयसंघटनम् अथवा विद्यालयसदस्यः सर्वेषु दिवसेषु, अवसरेषु, समारोहेषु, अन्यावसरेषु च राष्ट्रियध्वजोत्तोलनम् अथवा प्रदर्शनं कर्तुं शक्नोति। सम्मानदृष्ट्या प्रतिष्ठानदृष्ट्या च राष्ट्रियध्वजः-

i. यदा कदापि राष्ट्रियध्वजोत्तोलनं क्रियते चेत् ध्वजस्य स्थितिः सम्मानपूर्वकं तथा विशिष्टा भवेत्।

ii. विनष्टध्वजः अथवा अस्तव्यस्ततायुक्तध्वजः न प्रदर्श्येत।

iii. ध्वजः केनचित् अन्यध्वजेन अथवा ध्वजैः सह एकस्मिन् एव समये एकेनैव ध्वजदण्डेन न आरोहेत्।

iv. संहितायाः तृतीयभागे धारा IX इत्यत्र निहितोपबन्धम् अतिरिच्य कस्मिंश्चिदपि वाहने ध्वजं न आरोहेत्।

v. यदि कस्यचित् वक्तुः सभामञ्चोपरि ध्वजोत्तोलनं क्रियते, तर्हि ध्वजः तथा उत्तोलनीयः येन वक्ता यदा श्रोतृगणम् उद्दिश्य मुखं प्रदर्शयति तदा ध्वजः तस्य दक्षिणतः स्यात् अथवा ध्वजः भित्तौ पट्टस्थितौ वक्तुः पृष्ठतः अथवा तस्मादुपरि प्रदर्शितः स्यात्।

vi. यदा ध्वजः कस्याश्चित् भित्तेः आधारेण स्थाप्यते अथवा किञ्चित् वक्रीकृत्य स्थाप्यते तदा केसरवर्णः सर्वोपरि स्यात् अपिच यदा ध्वजः दीर्घीकृत्य दण्डायमानस्थितौ उत्तोल्यते, तदा केसरभागः ध्वजानुगुणं दक्षिणतः स्यात्। (अर्थात् ध्वजः पुरतः विद्यमानस्य दर्शकस्य वामतः स्यात्।)

vii. यथासम्भवं तावतीं सीमां यावदेव कस्यचित् निश्चिताकारवतः ध्वजस्य प्रदर्शनं स्यात्, पुनश्च यथासम्भवं ध्वजस्य औन्नत्यस्य दैर्घ्यस्य च अनुपातः 3:2 भवेत्।

viii. यत्र ध्वजोत्तोलनं क्रियते तत्र अपरः कश्चनापि ध्वजः अथवा काचित् पताका राष्ट्रियध्वजस्य अपेक्षया उन्नतस्थाने अथवा उपरि अथवा समपर्याये न स्यात्, पुनश्च यस्योपरि ध्वजोत्तोलनं क्रियते तत्र पुष्पं माला अथवा अन्यत् किमपि सप्रतीकं द्वितीयं वस्तु तस्य ध्वजदण्डस्य उपरि न स्यात्।

ix. अलङ्करणाय तोरणरूपेण अथवा पताकारूपेण अथवा एवं प्रकारकं किमपि कार्यं कर्तुं ध्वजस्य प्रयोगः न स्यात्।

x. पत्रनिर्मितध्वजस्य प्रयोगः प्रधानभूतराष्ट्रियावसरेषु सांस्कृतिकार्यक्रमेषु क्रीडास्पर्धादिषु च कर्तुं शक्यः। परन्तु समारोहसमापनानन्तरम् एतादृशपत्रनिर्मितध्वजान् न तु नाशयेत् न तु क्वचित् निक्षिपेत्। यथासम्भवम् एतादृशानां ध्वजानाम् आयत्तीकरणं पूर्णगौरवेन अथवा स्वविवेकानुगुणं स्यात्।

xi. यत्र ध्वजारोहणं मुक्तस्थाने क्रियते तत्र यथासम्भवं सूर्योदयात् सूर्यास्तं यावत् वातावरण-सम्बद्धपरिस्थितीः अनवगत्य ध्वजोत्तोलनं क्रियेत्।

xii. ध्वजारोहणं ध्वजबन्धनं च तथा न स्यात् येन ध्वजः नष्टः भवेत्।

xiii. यदा ध्वजः क्षतिग्रस्तः अथवा नष्टः जायते तदा पूर्णतया एकान्ते ध्वजं ज्वालयित्वा अथवा एतादृशं कञ्चन उपायं कृत्वा ध्वजः पूर्णतया नाशनीयः येन ध्वजस्य गरिमा अक्षुण्णः तिष्ठेत्।

## धारा II

**2.3** विद्यालयेषु राष्ट्रियध्वजोत्तोलनसन्दर्भे तदभिवादनप्रसङ्गे अथवा शपथग्रहणादिसन्दर्भे अधोलिखितानाम् आदर्शभूतानाम् अनुदेशानां पालनं स्यात्। यथा–

I. विद्यालयस्य छात्राः मुक्तचतुष्कोणाकारेण समागमिष्यन्ति। यस्य त्रिषु पक्षेषु छात्राः स्थास्यन्ति। चतुर्थपक्षस्य मध्यभागे ध्वजदण्डः भविष्यति। प्रधानाध्यापकः, मुख्यच्छात्रः ध्वजोत्तोलकः च (यदि प्रधानाध्यापकं विहाय अन्यः कोऽपि स्यात्) ध्वजदण्डात् त्रिपदपरिमितं पृष्ठतः भवेयुः।

ii. छात्राः कक्षाक्रमेण दश दश कृत्वा गणशः तिष्ठेयुः (अथवा आहत्य विद्यालयसंख्यानुसारम् अथवा अन्यगणनाधारेण)। एकस्य गणस्य पृष्ठतः अन्यगणः भविष्यति। कक्षायाः मुख्यच्छात्रः स्वकक्षायाः प्रथमपङ्क्तेः दक्षिणतः तिष्ठेत्। कक्षाध्यापकः स्वकक्षायाः अन्तिमपङ्क्तेः पादत्रयपरिमितात् दूरे पृष्ठतः मध्येस्थानं तिष्ठेत्। कक्षाः वर्गाकृतिं निर्माय तथा स्थास्यन्ति येन सर्वोच्चकक्षा दक्षिणतः स्यात्। तदनु अवरोहणक्रमेण अन्यकक्षाः तिष्ठेयुः।

iii. प्रत्येकं पङ्क्तेः अन्तरम् एकपादपरिमितं (30 इंच) स्यात्। एतावदेव अन्तरं प्रत्येकं कक्षायाः अपि स्यात्।

iv. यदा प्रत्येकं कक्षा सज्जा भवति, तदा कक्षानेता पुरतः गत्वा विद्यालयस्य चितछात्रनेतुः अभिवादनं कुर्यात्। यदा सर्वकक्षाः सिद्धाः जायन्ते, तदा विद्यालयस्य छात्रनेता प्रधानाध्यापकम् उपसृत्य तस्य अभिवादनं कुर्यात्। प्रधानाध्यापकः अभिवादनस्य उत्तरं दास्यति। तदनन्तरं ध्वजोत्तोलनं करिष्यते। अस्मिन् विषये विद्यालयस्य छात्रनेता साहाय्यं कर्तुं शक्नोति।

v. विद्यालयस्य यस्मै छात्रनेत्रे सञ्चलनस्य (अथवा सभायाः) उत्तरदायित्वं प्रदत्तम् अस्ति, सः ध्वजोत्तोलनात् साक्षात् पूर्वं सावधानस्थितिं सम्प्राप्तुम् आज्ञां दास्यति पुनश्च ध्वजोत्तोलनसन्दर्भे अभिवादनस्य आज्ञां दास्यति। सञ्चलनं किञ्चित् समयं यावत् अभिवादनस्थितौ स्थास्यति। पुनः आर्डर इति आदेशसम्प्राप्तिसमनन्तरं सावधानस्थितौ पुनरागमिष्यति।

vi. ध्वजाभिवादनात् परं राष्ट्रगानं भवति। कार्यक्रमसमयेऽस्मिन् सञ्चलनं सावधानस्थितौ स्थास्यति।

vii. शपथस्वीकरणस्य सर्वेषु अवसरेषु शपथग्रहं राष्ट्रगानात् परं करिष्यते। शपथग्रहणवेलायां सभा सावधानस्थितौ तिष्ठति। प्रधानाध्यापकः औपचारिकरूपेण शपथग्रहणं कारयति। सभा तेन सहैव शपथवाक्यानि द्विः उच्चारयति।

viii. विद्यालयेषु राष्ट्रियध्वजम् उद्दिश्य निष्ठायाः शपथग्रहणसमये अधोलिखितकार्यावधिः स्वीक्रियते। हस्तौ संयोज्य दण्डायमानाः सर्वे जनाः अधोलिखितशपथवाक्यं पुनः उच्चारयिष्यन्ति– "अहं राष्ट्रियध्वजम् उद्दिश्य अथवा तत् लोकतन्त्रात्मकं गणराज्यम् उद्दिश्य निष्ठायाः शपथं गृह्णामि। अयं ध्वजः यस्य प्रतीकः वर्तते।"

## भागः III

# केन्द्रीयसर्वकारेण, राज्यसर्वकारैः, तेषां संघटनैः, तथा संस्थाभिः राष्ट्रियध्वजस्य उत्तोलनम्/प्रदर्शनम्

## धारा I

**रक्षाप्रतिष्ठानानां/मिशनसंस्थानां/पक्षाणां च प्रमुखाः-**

3.1 अस्य पर्यायस्य उपबन्धाः तादृशानां रक्षाप्रतिष्ठानानां निमित्तं न्यस्ताः, येषां राष्ट्रियध्वजोत्तोलनसन्दर्भे स्वकीयनियमाः विद्यन्ते।

3.2 राष्ट्रियध्वजः विदेशस्थितौ तासां मिशनसंस्थानां प्रमुखमुख्यालयेषु अथवा आवासेषु उत्तोलयितुं शक्यते यत्र राजनैतिकानां वाणिज्यदूतप्रतिनिधीनां मुख्यालयेषु तथा स्वसर्वकारीयावासेषु स्वराष्ट्रियध्वजोत्तोलनस्य प्रथा वर्तते।

## धारा II

**सर्वकारदृष्ट्या ध्वजोत्तोलनम्-**

3.3 धारा I इत्येतस्मिन् प्रदत्तानाम् उपबन्धानाम् आधारेण अस्मिन् भागे प्रदत्तान् उपबन्धान् सर्वे सर्वकाराः, तेषां संघटनानि, संस्थाः च अनिवार्यतया पालयेयुः।

3.4 यदा कदापि सर्वकारदृष्ट्या ध्वजोत्तोलनं क्रियते तदा केवलं ध्वजः एव कार्यकरी भविष्यति। यत् मानकाधिकारिद्वारा निश्चितानां विशिष्टानाम् अनुरूपं स्यात्, पुनश्च यदुपरि आधिकारिकं मानकचिह्नं संलग्नीभूतं स्यात्। द्वितीये अवसरे अपि एतदेव उचितं यत् उपर्युक्ताकारस्य एतादृशः एव ध्वजः आरोहणीयः।

## धारा III

**ध्वजोत्तोलनस्य यथार्थं पद्धतिः-**

3.5 यदा कदापि ध्वजोत्तोलनं क्रियते, तदा ध्वजारोहणार्थं सम्मानपूर्वकं स्थानं प्रदेयम् पुनश्च तादृशे स्थाने ध्वजः आरोहणीयः यत् स्थानं स्फुटतया दृश्येत।

3.6 यत्र कुत्रापि सार्वजनिकभवनेषु ध्वजोत्तोलनस्य प्रथा वर्तते, तेषु भवनेषु रविवासरे अथवा अवकाशदिनेषु अथवा सप्ताहे सर्वेषु दिनेषु ध्वजोत्तोलनं कर्तुं शक्यते, पुनश्च अनेन सिद्धान्तेन निश्चितव्यवस्थां परित्यज्य अयं ध्वजः सूर्योदयात् सूर्यास्तं यावत् उत्तोलयितुं शक्यते। वातावरणं कथमपि भवतु नाम। एतादृशभवनेषु रात्रौ अपि ध्वजोत्तोलनं कर्तुं शक्यते किन्तु इत्थं विशेषावसरेषु एव क्रियते।

3.7 ध्वजः वेगेन उपरि आरोहणीयः, पुनश्च मन्दं मन्दमेव सादरम् अधः अवतारणीयः। ध्वजारोहणावतरणसमये विषाणं वाद्यते चेत् तत्र अवधानं देयं यत् विषाणध्वनिना सहैव ध्वजारोहणम् अवतारणं वा स्यात्।

3.8 यदि ध्वजारोहणं भवनस्य अग्रिमभागे अथवा अलिन्दे अथवा वातायने तिर्यक्भावेन अथवा कोणाकोणि क्रियते तर्हि ध्वजस्य केसरवर्णीयभागः दण्डस्य तद्भागे भवेत् यत् स्थानं वातायनतलात् अलिन्दात् अथवा

अग्रिमभागात् सर्वाधिकदूरे स्यात्।

3.9 यदा ध्वजारोहणं कस्याश्चित् भित्तेः आधारेण पट्टस्थितौ अथवा तिर्यकरीत्या क्रियते तदा केसरभागः सर्वोपरि स्यात् पुनः यदा ध्वजारोहणं साक्षात् दण्डायमानस्थितौ क्रियते तदा केसरभागः ध्वजानुगुणं दक्षिणतः स्यात् अर्थात् ध्वजः पुरतः वीक्षमाणस्य जनस्य वामतः स्यात्।

3.10 यदि ध्वजारोहणं सभामञ्चस्य उपरि क्रियते तर्हि तथा क्रियेत येन वक्ता यदा श्रोतृगणान् उद्दिश्य मुखं दर्शयति तदा ध्वजः तस्य दक्षिणतः स्यात्, नोचेत् ध्वजारोहणं भित्तौ फलकस्थितौ अथवा वक्तुः पृष्ठतः अथवा उपरि क्रियेत।

3.11 कस्याश्चित् मूर्तेः अनावरणकार्यक्रमावसरे ध्वजारोहणं महत्त्वतया भिन्नतया च क्रियेत।

3.12 यदि कस्यचित् मोटरयानस्य उपरि एकमात्रमेव ध्वजः उत्तोल्यते तर्हि तस्यैव यानस्य पुरोभागे दक्षिणतः एकस्मिन् दण्डे सदृढं बद्ध्वा ध्वजारोहणं स्यात्।

3.13 शोभायात्रायाम् अथवा सञ्चलने ध्वजनयनसमये ध्वजः शोभायात्रायाः अथवा सञ्चलनस्य दक्षिणतः स्यात् अर्थात् स्वयं ध्वजस्य दक्षिणतः स्थास्यति अथवा यदि अन्यध्वजसंयुक्ता काचित् अन्यपङ्क्तिः स्यात् तर्हि राष्ट्रध्वजः तस्याः पङ्क्तेः मध्ये स्थानम् अग्रतः भवेत्।

## धारा IV

### अनुचितक्रमेण ध्वजारोहणविषये-

3.14 विदीर्णः मलिनः प्रमर्दितः च ध्वजः न उत्तोलनीयः।

3.15 कस्यचित् जनस्य अथवा कस्यचित् वस्तुनः अभिवादनाय ध्वजः अधः कर्तुं न शक्यः।

3.16 कश्चनापि अन्यध्वजः अथवा पताका राष्ट्रियध्वजात् उपरि स्थापयितुं न शक्यते, पुनश्च अग्रे उपबन्धनं विहाय राष्ट्रियध्वजस्य समरेखायां वा स्थापयितुं न शक्येत। अन्यत् किमपि द्वितीयं वस्तु अपि तस्य ध्वजदण्डस्य उपरि न स्थापनीयः, यदुपरि ध्वजारोहणं क्रियते। एषु वस्तुषु पुष्पम्, माला, प्रतीकः चान्तर्भवति।

3.17 ध्वजप्रयोगः तोरणनिर्माणाय, पट्टिकानिर्माणाय अथवा अन्यप्रकारकसज्जीकरणाय न करिष्यते।

3.18 यथा कस्यचित् वक्तुः पीठाच्छादकरूपेण ध्वजप्रयोगः न स्यात्, तथैव वक्तुः मञ्चस्य उपरिभागः अपि ध्वजेन आवरितुं न शक्यः।

3.19 केसरवर्णम् अधः कृत्वा ध्वजारोहणं न स्यात्।

3.20 ध्वजः यथा भूमिं न स्पृशेत्, जले संलग्नः न भवेत् तथा प्रयत्नः विधेयः।

3.21 ध्वजारोहणम् अथवा ध्वजबन्धनं वा तथा न स्यात् येन ध्वजः नष्टः स्यात्।

## धारा V

### दुरूपयोगः

3.22 राज्यम्, सेना, केन्द्रीय-अर्ध-सैनिकबलस्य पक्षतया क्रियमाणं मृतकसंस्कारम् अतिरिच्य प्रसङ्गेऽस्मिन् यत् किमपि पूर्वमुक्तम्, तदाधारेण ध्वजप्रयोगः किमपि आच्छादयितुं न करिष्यते।

3.23 कस्मिंश्चित् याने, रेलयाने अथवा नौकाया: उपरिभागे, शिखरे, पाश्वभागे अथवा पृष्ठभागे आच्छादक-रूपेण ध्वजप्रयोग: न करणीय:।

3.24 एवंप्रकारेण ध्वज: न प्रयोक्तव्य: अथवा एवंप्रकारेण ध्वज: न स्थापनीय: येन ध्वज: नष्ट: अथवा मलिन: स्यात्।

3.25 यदा ध्वज: विदीर्ण: मलिन: वा जायते तदा स: ध्वज: न प्रक्षेपणीय:, न तु सम्मानरहितशैल्या तद्व्यवस्था चिन्तनीया, परं ध्वज: एकान्ते स्थिता क्वचित् पूर्णतया नाशनीय:। एतदर्थं तस्य ज्वालनम् अथवा ध्वजस्य गौरवानुरूपं कस्याश्चित् अन्यपद्धते: आश्रय: उचित: भविष्यति।

3.26 भवनम् आच्छादयितुं ध्वजप्रयोग: न करणीय:।

3.27 वस्त्रस्य अथवा गणवस्त्रस्य खण्डरूपेण ध्वजस्य प्रयोग: कर्तुं न शक्य:। ध्वज: तल्पेषु, करवस्त्रेषु, पेटिकासु, नेपकिन इत्यादिषु मुद्रापयितुं न शक्यते।

3.28 ध्वजस्य उपरि कथञ्चिदपि किमपि अक्षरं लेखितुं न शक्यते।

3.29 विज्ञापनकार्ये ध्वजस्य प्रयोग: भवितुं नार्हति। पुनश्च यस्मिन् दण्डे ध्वज: आरोप्यते तत्रापि विज्ञापनं स्थापयितुं न शक्यते।

3.30 किमपि वस्तु स्वीकर्तुम्, दातुम्, ग्रहीतुम्, अथवा नेतुम् आधारत्वेन ध्वजस्य प्रयोग: न करिष्यते।
किन्तु केषुचित् विशेषावसरेषु, राष्ट्रियदिवसेषु यथा गणतन्त्रदिवसस्य अथवा स्वतन्त्रतादिवसस्य समारोहेषु कार्यक्रमाणाम् एकभागरूपेण ध्वजोत्तोलनात् पूर्वम्, तस्मिन् पाटलपुष्पस्य दलानां स्थापनेन काचिदपि आपत्ति: नास्ति।

## धारा VI


### ध्वजाभिवादनम्-

3.31 ध्वजारोहणावसरे, ध्वजावतरणावसरे, सञ्चलने ध्वजनिरीक्षणावसरे वा ध्वजनयनकाले तस्मिन् स्थाने उपस्थिता: सर्वे अपि जना: ध्वजं प्रति मुखं करिष्यन्ति। तदा ते सावधानमुद्रायां स्थिता: भविष्यन्ति। गणवस्त्रधारिण: जना: योग्यशैल्या अभिवादनं कुर्यु:। यदा ध्वज: चलन्त्या पङ्क्त्या सह भवति तदा उपस्थिता: जना: सावधानमुद्रया स्थिता: भवेयु: अथवा यदा तेषां पुरस्तात् गम्यते तदा ते तस्य ध्वजस्य अभिवादनं कुर्यु:। विशिष्टव्यक्ति: शिरोवस्त्रं विनापि अभिवादनं स्वीकर्तुं शक्नोति।

## धारा VII

### अन्यराष्ट्रस्य ध्वजेन सह अथवा संयुक्तराष्ट्रसंघस्य ध्वजेन सह राष्ट्रियध्वजारोहणम्-


3.32 यदि अन्यराष्ट्रध्वजेन सह एकस्यां पङ्क्त्याम् राष्ट्रियध्वजस्यापि आरोहणं क्रियते तर्हि राष्ट्रियध्वज: सर्वेभ्य: दक्षिणत: स्थापयिष्यते अर्थात् यदि कोऽपि पर्यवेक्षक: ध्वजपङ्क्ते: मध्ये जनताम् उद्दिश्य मुखं कृत्वा तिष्ठेत् तर्हि राष्ट्रियध्वज: पूर्णतया तस्य दक्षिणत: भवेत्। इयं स्थिति: अध: विद्यमाने चित्रे स्पष्टीकृता।




3.33 राष्ट्रियध्वजात् परं तेषां राष्ट्राणाम् आङ्ग्लनामवर्णक्रमाणुसारम् अन्यदेशानां ध्वजाः स्थापनीयाः। एवं स्थितौ ध्वजपङ्क्तेः आरम्भे अन्ते च राष्ट्रियध्वजः स्थापयितुं शक्यः अथवा सहैव तत्रापि स्थापयितुं शक्यते यत्र वर्णकर्माणुसारेण राष्ट्रेषु तस्य स्थानं स्वाभाविकरूपेण आगच्छति। राष्ट्रियध्वजः सर्वादौ उत्तोलनीयः, पुनश्च सर्वान्ते अधः अवतारणीयः।

3.34 यदि मुक्तवृत्ते, वृत्तखण्डे, अर्धवृत्ते च ध्वजारोहणं क्रियते, तर्हि तदर्थं तस्याः धारायाः विगतखण्डे कथितः क्रियाविधिः अङ्गीकर्तव्यः। यदि पूर्णवृत्ताकारं कृत्वा ध्वजारोहणं क्रियते तर्हि राष्ट्रियध्वजेन वृत्तारम्भः अभूदिति मन्तव्यम्। पुनश्च अन्यराष्ट्रियध्वजः घटीसंख्याक्रमेण इत्थं स्थापयिष्यते येन अन्तिमध्वजः राष्ट्रियध्वजस्य पार्श्वे आगच्छेत्। ध्वजानां वृत्तारम्भम् आन्तञ्च दर्शयितुम् अन्यराष्ट्रध्वजस्थापनस्य आवश्यकता नास्ति। एवमेव पिहितवृत्ते वर्णक्रमानुसारेण स्वस्थाने अपि राष्ट्रियध्वजः स्थापयितुं शक्यः।

3.35 यदा राष्ट्रियध्वजः पुनश्च अन्यध्वजः मिलित्वा एकस्यां भित्तौ दण्डद्वये उपस्थाप्यते। दण्डद्वयमपि परस्परं कर्तयति इत्येवं स्थितौ राष्ट्रियध्वजः दक्षिणतः अर्थात् ध्वजस्य दक्षिणपार्श्वे भवेत् पुनश्च राष्ट्रियध्वजदण्डः द्वितीयध्वजदण्डस्य उपरि भवेत्। इयं स्थितिः अधः विद्यमाने चित्रे स्पष्टीक्रियते।



**3.36** यदा संयुक्तराष्ट्रसंघस्य ध्वजारोहणं राष्ट्रियध्वजेन सह क्रियते तर्हि तत् राष्ट्रियध्वजस्य कस्मिन् अपि पार्श्वे भवितुम् अर्हति। सामान्यपरम्परा एवम् अस्ति यत् राष्ट्रियध्वजारोहणम् एवं क्रियते येन पुरतः वीक्षणेन तत् सर्वाधिक्येन दक्षिणतः भवति। अर्थात् ध्वजदण्डं प्रति मुखं कृत्वा विद्यमानस्य दर्शकस्य वामतः भवति। इयं स्थितिः अधः प्रदत्तचित्रेण स्पष्टीक्रियते।




**3.37** यदा राष्ट्रियध्वजारोहणम् अन्यध्वजैः सह क्रियते तदा सर्वे अपि ध्वजदण्डाः समानाकारवन्तः भवेयुः। अन्ताराष्ट्रियपरम्परानुगुणं शान्तिकाले कस्यचित् एकराष्ट्रस्य ध्वजारोहणस्य अपेक्षया उन्नतस्थले अन्यराष्ट्रध्वजारोहणं वर्जितम् अस्ति।

**3.38** एकेनैव ध्वजदण्डेन एकदा राष्ट्रियध्वजारोहणम् अन्यध्वजेन अन्यध्वजैः वा सह न करणीयम्। भिन्नभिन्नध्वजार्थं भिन्नभिन्नध्वजदण्डः भविष्यति।

## धारा VIII

### सार्वजनिकभवनेषु/सर्वकारीयावासेषु ध्वजारोहणम्-

**3.39** सामान्यतया उच्चन्यायालयेषु, सचिवालयेषु आयुक्तकार्यालयेषु जिलान्यायालयेषु, कारावासेषु, जिलामण्डलकार्यालयेषु, नगरपालिकासु, जिलापरिषत्सु, विभागीयक्षेत्रेषु, सार्वजनिकक्षेत्राणाम् उपक्रमकार्यालयेषु इव सार्वजनिकभवनेषु ध्वजारहणं करणीयम्।

**3.40** सीमान्तक्षेत्रेषु सीमाशुल्कनियन्त्रणस्थानेषु, निरीक्षणस्थानेषु, सीमानियन्त्रणस्थानेषु, अपिच अन्येषु एतादृशविशेषस्थानेषु यत्र ध्वजोत्तोलनस्य विशेषमहत्त्वं भवति, तत्र तत्र ध्वजोत्तोलनं शक्यते। एतदतिरिच्य सीमावर्तिदलानां शिबिरेषु अपि ध्वजारोहणं शक्यते।

**3.41** राष्ट्रपतिः, उपराष्ट्रपतिः, राज्यपालः, उपराज्यपालः यदा स्वमुख्यालये भवन्ति, तदा तेषां सर्वकारीयनिवासस्थानेषु राष्ट्रियध्वजारोहणं स्यात्। यदा इमे स्वमुख्यालयात् बहिः विदेशयात्रायां भवन्ति तदा येषु भवनेषु ते निवसन्ति तेषु भवनेष्वपि राष्ट्रियध्वजारोहणं स्यात्। सर्वकारीयनिवासस्थानेषु उत्तोलितः राष्ट्रियध्वजः सम्भ्रान्तजनस्य मुख्यालयात् बहिर्गमने सति अवतारणीयः। पुनश्च मुख्यालये प्रत्यागमनसमनन्तरमेव राष्ट्रियध्वजः पुनः उत्तोलनीयः। यदा सम्भ्रान्तजनाः मुख्यालयात् बहिः कस्यचित् स्थानस्य भ्रमणे रताः भवन्ति, तदा यस्मिन् भवने ते निवसन्ति, तस्य भवनस्य मुख्यद्वारात् प्रवेशसमनन्तरमेव राष्ट्रियध्वजारोहणं स्यात्। पुनश्च तस्य बहिरागमनसमनन्तरमेव राष्ट्रियध्वजः अवतारणीयः। गणतन्त्रदिवसे, स्वतन्त्रतादिवसे, महात्मगान्धिजयन्त्याम्, राष्ट्रियसप्ताहे: (अप्रिलमासस्य षष्ठदिनाङ्कात् त्रयोदशदिनाङ्कं यावत् जलियांवालावीरात्मनां स्मृतौ।) भारतसर्वकारणे निर्दिष्टराष्ट्रियोल्लासरूपेण कस्मिंश्चित् अन्यस्मिन् दिने अथवा राज्यविशेषे तस्य राज्यस्य वर्षपूर्त्यवसरे च सर्वकारीयनिवासस्थानेषु राष्ट्रियध्वजारोहणं सूर्योदयात् सूर्यास्तं यावत् स्यात्। तद्दिने सम्भ्रान्तव्यक्तिः तेषु दिनेषु मुख्यालये उपतिष्ठेत् अथवा न।

**3.42** यदा राष्ट्रपतिः, उपराष्ट्रपतिः अथवा प्रधानमन्त्री कस्याश्चित् संस्थायाः निरीक्षणया गच्छेत् तदा तस्य तस्य जनस्य सम्मानाय तया संस्थया राष्ट्रध्वजारोहणं करणीयम्।

**3.43** वैदेशिकाः सम्भ्रान्तजनाः अर्थात् राष्ट्रपतिः, उपराष्ट्रपतिः, सम्राट् अथवा युवराजः अथवा प्रधानमन्त्री इत्येतेषां निरीक्षणयात्रावसरे एतादृश्यः स्वयत्तसंस्थाः याः तेषां सम्भ्रान्तानां जनानां स्वागतं कुर्वन्ति। तस्याः यात्रायाः आधारेण सः सम्भ्रान्तजनः यानि सर्वकारीयभवनानि गच्छति, तत्र धारा VII इत्यस्मिन् विहितानां नियमानाम् अनुसारं सम्बद्धदेशस्य ध्वजेन सह राष्ट्रियध्वजः उत्तोलनीयः।

## धारा IX

### मोटरयानेषु ध्वजारोहणम्-

**3.44** मोटरयानेषु ध्वजारोहणस्य विशेषाधिकारः केवलम् अधोलिखितजनपर्यन्तं सीमितः वर्तते-

1. राष्ट्रपतिः।
2. उपराष्ट्रपतिः।
3. राज्यपालः अथवा उपराज्यपालः।
4. विदेशेषु स्थितानां भारतीयमिशनसंस्थानाम् अध्यक्षाः। तेषु देशेषु यत्र ते नियुक्ताः वर्तन्ते।
5. प्रधानमन्त्री तथा अन्यकेबिनेटमन्त्री,
   केन्द्रस्य राज्यमन्त्री तथा उपमन्त्री,
   राज्यशासितक्षेत्रेषु तथा संघशासितक्षेत्रेषु मुख्यमन्त्री तथा अन्यकेबिनेटमन्त्री, राज्यशासितक्षेत्रेषु तथा संघशासितक्षेत्रेषु राज्यमन्त्रिणः तथा उपमन्त्रिणः।
6. अध्यक्षः, लोकसभा,
   उपाध्यक्षः, राज्यसभा,
   उपाध्यक्षः, लोकसभा,
   राज्येषु विधानपरिषदाम् अध्यक्षाः,

राज्यशासितक्षेत्रेषु विधानसभानाम् अध्यक्षाः, संघशासितक्षेत्रेषु विधानसभानाम् अध्यक्षाः,
राज्येषु विधानपरिषदाम् उपाध्यक्षाः,
राज्यशासितक्षेत्रेषु तथा संघशासितक्षेत्रेषु विधानसभानाम् उपाध्यक्षाः।

7. भारतस्य मुख्यन्यायाधिपतिः,
उच्चतमन्यायालयस्य न्यायाधीशः,
उच्चन्यायालयानां न्यायाधिपतिः, उच्चन्यायालयानां न्यायाधीशः।

**3.45** **3.44** तमस्य परिच्छेदस्य पञ्चमखण्डात् सप्तमखण्डपर्यन्तम् उद्दिष्टसम्भ्रान्तव्यक्तिः यदा कदापि आवश्यकम् अथवा उचितं चिन्तयति तदा स्वयाने राष्ट्रियध्वजारोहणं कर्तुं शक्नोति।

**3.46** यदा कश्चनापि वैदेशिकः सम्भ्रान्तजनः सर्वकारव्यवस्थायां निर्दिष्टेन यानेन यात्रां करोति, तदा राष्ट्रियध्वजः यानस्य दक्षिणतः उत्तोलयितुं शक्यः, अपिच सम्बद्धान्यदेशस्य व्यक्तेः ध्वजः वामतः उत्तोलनीयः।

## धारा X

**रेलयानेषु/वायुयानेषु ध्वजारोहणम्-**

**3.47** यदा राष्ट्रपतिः देशान्तः एव विशेषरेलयानेन क्वचित् यात्रां विधत्ते तदा यस्मात् रेलवेस्थानकात् यानं प्रतिष्ठते। तत्रत्यं रेलवेस्थानकम् उद्दिश्य रेलयानचालककोष्ठे राष्ट्रियध्वजारोहणं स्यात्। राष्ट्रियध्वजः केवलं तदैव उत्तोलनीयः यदा तत् विशेषयानम् अवरुद्धं तिष्ठेत् अथवा यत्र तेन यानेन प्राप्तव्यं तत् स्थानं प्राप्यमानम् अस्ति।

**3.48** राष्ट्रपतिः, उपराष्ट्रपतिः अथवा प्रधानमन्त्री इत्येतेषां विदेशयात्रासमये तेषां विमाने राष्ट्रियध्वजारोहणं करिष्यते। यद्देशम् उद्दिश्य यात्रा क्रियते तद्देशस्य ध्वजः अपि राष्ट्रियध्वजेन सह उत्तोलनीयः। परन्तु मार्गे यदा कस्मिंश्चित् देशे विमानम् अवतरति, तदा शिष्टाचारस्य सद्भावनायाः च कारणेन तस्मिन् स्थाने तत्तद्देशानां ध्वजोऽपि उत्तोलनीयः।

**3.49** यदा राष्ट्रपतिः देशे क्वचित् भ्रमणार्थं गच्छति तदा राष्ट्रियध्वजारोहणं वायुयानस्य तस्मिन् पार्श्वे करिष्यते यस्मात् भागात् राष्ट्रपतिः विमानम् आरोहति पुनः अवतरति।

## धारा XI

**ध्वजस्य विनमनम्-**

**3.50** अधोलिखितानां सम्भ्रान्तजनानां देहावसाने तेषां देहावसानदिने तेषां नाम्नां पुरतः उल्लिखितस्थानेषु राष्ट्रियध्वजस्य अवनमनं स्यात्।

| **सम्भ्रान्तजनः** | **स्थानम्** |
|---|---|
| राष्ट्रपतिः | |
| उपराष्ट्रपतिः | सम्पूर्णभारते |
| प्रधानमन्त्री | |
| लोकसभाध्यक्षः | देहल्याम् |

| | |
|---|---|
| भारतस्य मुख्यन्यायाधिपतिः | |
| केन्द्रीयकेबिनेटमन्त्री | देहल्यां तथा राज्यराजधानीषु |
| केन्द्रस्य राज्यमन्त्री तथा उपमन्त्री | देहल्याम् |
| राज्यपालः | |
| उपराज्यपालः | |
| राज्यमुख्यमन्त्री | |
| संघशासितक्षेत्राणां मुख्यमन्त्रिणः | सम्बद्धसम्पूर्णराज्ये अथवा संघशासितक्षेत्रे |
| कस्यचित् राज्यस्य केबिनेटमन्त्री | सम्बद्धराज्यस्य राजधान्याम् |

**3.51** यदि कस्यचिदपि सम्भ्रान्तजनस्य मृत्युवार्ता अपराह्णे प्राप्यते तर्हि उपरि उक्तेषु स्थानेषु तदनन्तरदिने अपि ध्वजस्य अवनमनं सम्भविष्यति। परन्तु तद्दिने सूर्योदयात् पूर्वम् अन्त्येष्टिक्रिया न सम्पन्ना चेत्।

**3.52** उक्तस्य सम्भ्रान्तजनस्य अन्त्येष्टिदिने तस्मिन् स्थाने यत्र अन्त्येष्टिः क्रियते, तत्रापि ध्वजावनमनं क्रियेत।

**3.53** यदि कस्यापि सम्भ्रान्तजनस्य मृत्योः कारणेन राजकीयशोकस्य पालनं क्रियते तर्हि केन्द्रीयसम्भ्रान्त-व्यक्तिविषये सम्पूर्णे भारतवर्षे ध्वजानमनं स्यात्। पुनः यदि कस्यचिदपि राज्यस्य अथवा संघशासितक्षेत्रस्य सम्भ्रान्तव्यक्तेः विषये सम्बन्धिते सम्पूर्णराज्ये पूर्णसंघशासितक्षेत्रे वा पूर्णशोकपालनकाले ध्वजः अवनमितः स्यात्।

**3.54** वैदेशिकविशिष्टजनानां मृत्युकारणेन ध्वजावनमनविषये राजकीयशोकपालनविषये च विशेषाणुदेशप्रस्तावनं करिष्यते, यस्मिन् विषये गृहमन्त्रालयेन काले काले संसूचयिष्यते।

**3.55** उपर्युक्तोपबन्धेषु सत्स्वपि, यदि ध्वजावनमनदिने गणतन्त्रदिवसः, स्वतन्त्रतादिवसः, महात्मगान्धिजयन्ती, राष्ट्रियसप्ताहः (अप्रिलमासस्य षष्ठदिनाङ्कात् त्रयोदशदिनाङ्कं यावत् जलियांवाला बाग इत्यस्मिन् वीरपुत्राणां स्मृतौ) भारतसर्वकारेण विनिर्दिष्टस्य राष्ट्रोयोल्लासस्य कोऽपि अन्यदिवसः अथवा कस्यचित् राज्यस्य विषये तद्राज्यनिर्माणाय अथवा वर्षपूर्तिसमारोहविषयः इत्येते कार्यक्रमाः एकस्मिन् काले भवन्ति तर्हि तत् भवनम् अतिरिच्य यत्र मृतकानां शवः स्थापितः अस्ति। अन्यस्मिन् स्थाने ध्वजस्य अवनमनं न शक्यते। यावत् पर्यन्तं शवः न स्वीक्रियते तावत् पर्यन्तं ध्वजावनमनं भविष्यति। शवस्वीकरणात् परं तस्मिन् भवने ध्वजः उपरि उत्तोलनीयः।

**3.56** यदि शोकपालनं ध्वजं स्वीकृत्य शोभायात्रारूपेण अथवा सञ्चालनमाध्यमेन क्रियते, तर्हि शूलस्य अग्रभागे कृष्णवर्णीयपताकाद्वयं संयोजयिष्यते। यत् स्वाभाविकरूपेण लम्बमानं भविष्यति। एवं कृष्णवर्णीयवस्त्रस्य प्रयोगः सर्वकारस्य आदेशेन एव कर्तुं शक्यते।

**3.57** ध्वजावनमनसमये ध्वजः किञ्चित् क्षणं यावत् पूर्णतया उपरि उत्तोलयिष्यते। ततः ध्वजः अधः आनेतव्यः किन्तु दिनानन्तरं सायं ध्वजावतरणात् पूर्वं पुनः एकवारं ध्वजः उपरि उत्तोलनीयः।

**टीप्पणीः** ध्वजस्य अर्धोवनमनस्य तात्पर्यम् इदमेव वर्तते यत् शिखरं यावत् अथवा गाई लाइन इत्यस्य अर्धभागं यावत् ध्वजस्य आनयन। पुनश्च गाई लाइन न भवति चेत् दण्डस्य अर्धभागं यावत् ध्वजस्य अवनमनम्।

**3.58** राजकीयस्य/सैनिकस्य/केन्द्रीयार्धसैनिकबलानां सम्मानेन साकम् अन्त्येष्टि-अवसरे शवपेटिका अर्धध्वजेन

आव्रियते पुनश्च ध्वजस्य केसरभागः शवपेटिकायाः अग्रभागं प्रति भविष्यति। कब्र इत्यस्मिन् अथवा चितायां ध्वजस्य निखातनं ज्वलनं च न करिष्यते।

**3.59** अन्यदेशानां राष्ट्राध्यक्षाणाम् अथवा वैदेशिकसर्वकारस्य अध्यक्षाणां मृत्युसमये तस्मिन् देशे प्रत्यायितः भारतीयदूतावासः राष्ट्रियध्वजम् अवनमयितुं शक्नोति। यद्यपि सा घटना गणतन्त्रदिवसे, स्वतन्त्रतादिवसे, महात्मगान्धिजयन्त्याम्, राष्ट्रियसप्ताहे (अप्रिलमासस्य षष्ठदिनाङ्कात् त्रयोदशदिनाङ्कं यावत् जलियांवाला बाग इत्यस्मिन् वीरपुत्राणां स्मृतौ) अथवा भारतसर्वकारस्य विनिर्दिष्टस्य राष्ट्रियोल्लासस्य अन्यस्मिन् कस्मिन् अपि दिने वा भवेत्। तद्देशस्य कस्यचित् अन्यसम्भ्रान्तजनस्य मृत्युस्थितौ दूतावासेषु ध्वजावनमं न स्यात्। यावत् पर्यन्तं तद्देशस्य स्थानीयप्रथानागुणम् अथवा शिष्टाचारानुगुणं (यस्य पत्रसङ्केतः, यत्र कुत्रापि आवश्यकं स्यात्, राजकीयकोर इत्यस्य अधिष्ठाता डीन आफ दि डिप्लोमेटिक कोर इत्यस्मात् संस्थापनीयम्) विदेशिदूतावासस्य राष्ट्रियध्वजावनमनस्य अपेक्षा न स्यात्।

❖❖❖